শ্ৰীঃ

শ্ৰীমতে রামানুজায নমঃ

শ্ৰীমতে নিগমান্তমহাদেশিকায নমঃ

ৱিল্লূর্ নডাদূর্ শ্ৰী শ্ৰীনিধেঃ কৃতিষু

# ॥ নারৱল্লাকমণিমালা ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্ৰী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ নাৱল্পাকমণিমালা ॥

করিতাজিতকল্লোলিকন্যকাকান্তৱক্ষসে।
করুণাদিগুণাঢ্যায কমলানিধযে নমঃ ॥

সুমশরশতগর্ৱাক্ষেপদক্ষস্ৱৱর্ষ্মা
হিমকরসহজাতাৱাসভূর্যস্য ৱক্ষঃ।
সমকরসরিতস্তৎসন্নিধৌ সন্নিৱিষ্টঃ
মম করযুগভূতেরঞ্জলেরস্তু লক্ষ্যম্॥ **1** ॥

যথা ক্রতূনাং মহিতোঽশ্ৱমেধঃ
তথা সুরাণাং মহিতোঽশ্ৱৱক্ত্রঃ।
ইতীদমালোচ্য হি দেশিকেন্দ্রাঃ
লক্ষ্যং ক্রতূনাং তমিমং ভজন্তি॥ **2** ॥

ভজতাং মধুজিদ্ৱচোৱিলাসং
কলযত্যেষ রমাতুরঙ্গৱক্ত্রঃ।
মধুজিৎপদকীর্তিতঃ পুরাণে
তদযং হীতি ভজন্তি দেশিকেন্দ্রাঃ॥ **3** ॥

সুধাংশুবিম্বস্থিতদিৱ্যদেহং
ৱিধাতৃযোষিদ্বিনতাঙ্ঘ্রিপদ্মম্।
সুধাঝরীতুল্যৱচঃপ্রৱাহৈঃ
তথাৱিধং ধাম ৱিভাতি কিঞ্চিৎ॥ **4** ॥

আকন্ধরমাদিপুমান্
উপরি চ গন্ধর্ৱনাথসন্তানঃ।

ইন্ধে কশ্চন হৃদযে
    কিং ধাতাপ্যস্তি মামলঙ্কর্তুম্॥ **5**॥

জম্বূদ্বীপে ৱিবুধমহিতে শ্রীৱিলাসাস্পদেঽস্মিন্
    জম্বূপাকে ৱিবুধমহিতে শ্রীনিৱাসাস্পদেঽস্মিন্।
জম্বূৱর্ণং ৱপুষি ৱহতস্সম্পদৃক্ষেঽভিজাতঃ
    জম্বূরাগং মনসি চ গুরুস্সম্পদে নস্সমিন্ধে॥ **6**॥

মৃগশিরসি ধরণ্যামুদ্গতো দেশিকেন্দ্রঃ
    মৃগশিরসি কলানামাস্পদে সক্তবুদ্ধিঃ।
মৃগশিরসি হিরণ্যাক্ষেপকেঽপ্যেষ কুর্যাৎ
    মৃগশিরসি নিৱেশ্যান্ মাদৃশান্ জ্ঞানপূর্ণান্॥ **7**॥

শ্রীরামানুজজন্মর্ক্ষমধ্যর্ক্ষে সম্ভৱন্ গুরুঃ।
আচার্যতাং চ দৈৱৎৱমাত্মনো জ্ঞাপযত্যসৌ॥ **8**॥

ৱ্যাখ্যাং সারাৱলের্যামতনুত ভগৱান্ সুন্দরার্যো গুরুর্নঃ
    ৱ্যাখ্যাং শ্রীতত্ত্বসারস্য চ গুরুমহিতগ্রন্থরত্নোত্তমস্য।
যোঽযং সোঽযং যদীযং পদকমলযুগং মস্তকে সংৱিধত্তে
    নিত্যং তস্মৈ নমস্তাৎ সকলভৱুকভূম্যণ্নযার্যোত্তমায॥ **9**॥

উন্নযামি ৱিনতানিতি হর্ষাৎ
    অন্নযন্তমমুমণ্নযমাহুঃ।
এতদানতহযাস্যসেৱিনী
    ভারতীললিতভারতীৱিদঃ॥ **10**॥

শ্রীকান্তরামানুজসম্পদৃক্ষং
    শ্রীদান্তরামানুজহৃদ্যমীডে।
ৱেদান্তরামানুজমৌলিৱন্দ্যং
    ৱেদান্তরামানুজপাদসক্তম্॥ **11**॥

শ্রীমদ্ভাষ্যসুৱর্ণভূষিততনুং শ্রীৱক্ত্রৱাণীরসৈঃ
    সম্যঙ্মোহিতসর্ৱলোকহৃদযাং শান্তাং চ কান্তাং তথা।
ভূযোভিস্সুমনঃ কুলৈরপি ধৃতাং ৱেদান্তরামামহং
    তদ্ভ্রাতুর্গুরুসত্তমস্য সমিতৌ লীলাৱতীং চিন্তযে॥ **12**॥

না ৱিল্ রামং মনসি সততং সংৱহন্ সীতযে তং
    নাৱিল্ রামামপি ভগৱতো নাভিপদ্মোত্থিতস্য।
নাৱিল্লাকে ৱিরচিতজনেঃ সন্মণেস্সৎসভাযাং
    না ৱিল্লূরান্ ইতি কৃতিমুদে কিঞ্চন ৱ্যাজহার॥ **13**॥

॥ ইতি নাৱল্লাকমণিমালা সমাপ্তা॥